**दिनाङ्क :-31.03.2026**

**प्रात: - 06:55**

**गृह-मन्त्री /नक्सल्वाद:**

केन्द्रीय-गृह-मन्त्री अमितशाहः देशे नक्सल्-वादिनां निर्मूलनार्थं अर्धसैनिक-बलानां, आरक्षकाणां, जनानां च प्रयत्नानां प्रशंसाम् अकरोत्। "वामपथावलम्बिना उग्रवादेन प्रभावितक्षेत्रेषु विकासः बाधितः आसीत्, परन्तु अधुना नरेन्द्रमोदी-सर्वकारस्य नेतृत्वे एतेषु क्षेत्रेषु विकासः प्रचलतीति च सः अवोचत्। गृहमन्त्री अमितशाहः देशे वामपक्षस्य उग्रवादात् मुक्तेः प्रयत्नानां विषये लोकसभायां चर्चायाः उत्तरम् अददात्। तेनोक्तं यत् एते जायमानाः न्यायवादिनः एकस्य शस्त्राभियानस्य पक्षपातिन: सन्ति। वयं अन्यायं विरुद्ध्य योद्धुकामाः स्मः। यदि कोऽपि जनः संविधाने विश्वसति चेत् अन्यायस्योपायः अस्माकं संविधाने अस्तीति सः जानीयात्। न्यायालयानां निर्माणं जातम्, विधानसभानां निर्माणं जातम्, मण्डलपञ्चायतानां निर्माणं जातम्, तहसीलपञ्चायतानां निर्माणं जातम्। सम्पूर्णां व्यवस्थां निराकृत्य शस्त्राणि स्वीकृत्य व्यवस्था कथं भविष्यति? अयं नरेन्द्रमोदीवर्यस्य सर्वकारः अस्ति, यः शस्त्राणि स्वीकरोति तस्य गणनैव न भविष्यति। श्रीशाहः अवदत् यत् चतुर्विंशत्यधिकद्विसहस्रतमवर्षतः अस्य वर्षस्य मार्चपर्यन्तम् आरक्षिबलैः सह जातेषु सङ्घट्टेषु सप्तशताधिक- नक्सलमतावलम्बिनः जनाः मारिताः सन्तीति। सः सूचितवान् यत् द्वाविंशतिशताधिक-नक्सल्-वादिनः गृहीताः, प्रायः पञ्चसहस्र- नक्सल्-वादिनश्च शरणागताः सन्तीति। "छत्तीसगढस्य बस्तर्-प्रदेशे नक्सलवादः प्रायः समाप्तः अस्तीति च तेनोक्तम्।

**राष्ट्रपतिः-बिहार-कर्नाटक भ्रमणः**

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्यारभ्य बिहार-कर्नाटक-प्रदेशयोः भ्रमणं करिष्यति। तस्याः यात्रायाः प्रथमदिने राष्ट्रपतिः श्वः बिहारस्य राजगीर्-नगरे नालन्दा-विश्वविद्यालयस्य दीक्षान्त-समारोहे भागं ग्रहीष्यति, राष्ट्रपतिः मुर्मुः कर्णाटकस्य तुमकुरु-नगरस्य श्री-सिद्धगङ्गा-मठे डा. श्री-श्री-शिवकुमार-महास्वामी-वर्यस्य नवदशोत्तरैकशत-तमस्य जन्मदिनस्य, गुरुवन्दनस्य च समारोहे भागं ग्रहीष्यति।

**प्रधानमन्त्री महावीरजयन्ती**

प्रधानमन्त्री नरेन्द्रमोदी अद्य महावीरजयन्त्यवसरे गान्धीनगरे सम्राट् सम्प्रतीति सङ्ग्रहालयस्य उद्घाटनेन सह गुजरातस्य वाव्-थराड् इत्यत्र प्रायः विंशतिसहस्र कोटिरूप्यकाणां अनेकेषां विकासपरियोजनानां उद्घाटनम् करिष्यति। श्रीनरेन्द्रमोदी कच्छ-जनपदस्य खावडा-नगरे विश्वस्य बृहत्तमस्य हायब्रिड्-अक्षय-ऊर्जा इत्युद्याने ऊर्जामन्त्रालयान्तर्गतं सार्धत्रिसहस्राधिक- कोटिरूप्यकाणां त्रिस्रः परियोजनाः राष्ट्राय समर्पयिष्यति। सः सार्धसप्तशत- कोटिरूप्यकाणां व्ययेन इदार्-बडोली-बायपासेति-चतुष्पथ-मार्गस्य, धोलावीरा-मौवाना-वौवा-शान्तल्पुर्-खण्डस्यापि शिलान्यासं करिष्यति। श्रीमोदी पञ्चसहस्राधिक- कोटिरूप्यकाणां व्ययेन निर्मितस्य अहमदाबाद्-धोलेरा-मार्गस्य उद्घाटनमपि करिष्यति। श्रीमोदी रेल्मन्त्रालयस्य प्रायःनवसहस्र- कोटिरूप्यकाणां परियोजनाः राष्ट्राय समर्पयिष्यति।

**उत्तराखंड-चार धाम यात्राः**

उत्तराखण्ड्-राज्ये, चारधाम-यात्रायाः सुगमं सुरक्षितं च आचरणं सुनिश्चेतुं वाणिज्य-यात्रिक-वाहनानां कृते "ग्रीन्-कार्ड्-व्यवस्था" इति प्रवर्तिता अस्ति। परिवहनमन्त्री प्रदीपबत्रा ह्यः हरिद्वारमण्डलस्य रोशनाबाद्-नगरे अस्याः व्यवस्थायाः उद्घाटनम् अकरोत्। ग्रीन्-कार्ड्-व्यवस्थेति यात्रायां भागं ग्रहीतॄणां वाणिज्यिक-वाहनानां तान्त्रिक-स्वास्थ्यं सुरक्षां च सुनिश्चितं करिष्यति। एतत् न केवलं वाहनस्य योग्यतां प्रमाणीकरोति अपितु आपत्काले तत्क्षणमेव वाहनसम्बद्धानि सर्वाणि आवश्यकानि विवरणानि अपि प्रददाति।

**उर्वरक भण्डार**

देशे उर्वरकस्य, पेट्रोल् इत्यस्य, डीज़ल् इत्यस्य, एल्. पी. जी. इत्यस्य, पी. एन्. जी. इत्यस्य च पर्याप्तानि भण्डाराणि सन्तीति सर्वकारेण आश्वस्तिः प्रदत्ता।

**खेलो-इण्डिया**

राय्पुर्-नगरे आयोजिते खेलो-इण्डिया-ट्रैबल्-गेम्स्-क्रीडायां महिला-हाकी इत्यस्य अन्तिम-स्पर्धायां मिजोरम् -ओडिशा-प्रदेशौ च प्रविष्टौ।

**आइपीएल परिणामः**

आई. पी. एल. इति क्रिकेट्-क्रीडायां, गतरात्रौ गुवाहटी-नगरे तृतीयायां स्पर्धायां, राजस्थान्-रायल्स्-दलम् चेन्नै-सूपर्-किङ्ग्स्-दलम् अष्ट-स्तोभैः पराजयत। प्रथमतया क्रीडता चेन्नै-सूपर्-किङ्ग्स् इति दलं सप्तदशोत्तरैकरशतम् धावनाङ्कान् व्यरचयत्, प्रत्युत्तरे, राजस्थान-रायल्स् दलं विकेट्-द्वयस्य हानौ लक्ष्यावाप्तिमकरोत्।

**।।इति वार्ताः।।**